प्राञ्चं प्रगृह्णात्यूर्ध्वं ऊ षु ण इति” (११,४२) ८सू०। “प्रसारितबाहुः पिण्डम्” क०। “अवहृत्योपरिनाभि धारयन्नश्वप्रभृतीनभिमन्त्रयते स जातः स्थिरो भव शिवो भवेति”। (११,४२,४५)” ९सू०।“अवहृत्य पिण्डं नाभेरुपरि धारयन्”क०।“धारयत्येषामुपरि पिण्डमनुस्पृशन् प्रैतु वाजी वृषाग्निमित्यश्वखरयोः” (११,४६) १० सू०। “एषां पशूनामुपरि पिण्डमनुपस्पृशन् धारयति प्रैतु वाजीत्यश्वस्य, वृषाग्निमिति खरस्य” क०। “अग्न आयाहीत्याहृत्य (११,४६) खराच्छागस्यर्तं सत्यमित्यानिधानात्” (११,४७) ११ सू०। “धारयत्यनुपस्पृशन्नेव” क०। “आयन्त्यावर्त्य पशूनजः पुरस्ताद्रासभो मध्ये” १२सू०। “स्वस्थानस्थितानामेवावृत्तिः” क०। “अनड्वा पुरुषमीक्षते पूर्ववदग्निं पुरीष्यमिति”। (११,४७) १३ सू०। “अनन्यार्थत्वात् पूर्ववच्छब्देनाग्निषु प्रज्वलत्स्वित्युच्यते (२,११)” क०। “उत्तरत आहवनीयस्योद्धतावोक्षिते सिकतोपकीर्णे परिवृते प्राग्द्वारे निदधात्योषधय इति” (११,४७,४८)१४ सू०। “वि पाजसेति” (११,४९) प्रमुच्यैनमजलोमान्यादाय प्रागुदीचः पशूनुत्सृजति १५ सू०। “प्रमुच्य पिण्डमजलोमानि गृहीत्वा प्रागुदीचीं दिशं प्रति पशूनुत्सृजति” क०। “आपो हि ष्ठेति (११,५०) पर्णकषायपक्वमुदकमासिञ्चति पिण्डे” १६ सू०। “पर्णकषायं पलाशकषायम्” क०। पलाशत्वग्भिःक्वथितमुदकं पलाशकषायपक्वम्” संग्र०। “फेनं च तूष्णीं ततः कृत्वा” १७सू०। “तत एवोदकात् पूर्वतरं फेनं कृत्वोदकमासिञ्चति चशब्दात्फेनम्” क०। “अजलोमभिः संसृजति मित्रः संसृज्येति (११, ५३)” १८ सू०। “पिण्डम्”। “शर्करायोरसाश्मचूर्णैश्च रुद्राः संसृज्येति (११,५४)” १९सू०। “शर्करा प्रसिद्धा अयोरसो लोहसिङ्घाणः कीट इति यः प्रसिद्धः अश्मचूर्णः पाषाणचूर्णः चशब्दादेतैः पिण्डं संसृजति” क०। “शर्कराः सूक्ष्मकन्दुकाः अयोरसो लोहरसो यस्ताप्यमानाल्लोहात्पृथग्भवतीति कीट इति लोके प्रसिद्धः अश्मा दृढपाषाणः तेषां चूर्णैः संसृजति” संग्र०। ‘संसृष्टामिति” (११, ५५,५७) संयौति” २०सू०। “पिण्डं मिश्रयति आप्लावयतीत्यर्थः” क०। ‘अषाढां करोति महिषी प्रथमविन्ना तदाख्या” २१सू०। “अषाढाख्यामिष्टकां महिषी करोति। महिषीशब्दस्यान्यत्राप्रसिद्धत्वादाह प्रथमविन्ना तदाख्या” “तद्वैव महिषीति”ब्रा० (६,५,२,१) क०। ‘भार्याणां मध्ये प्रथमं लब्धा प्रथमपरिणीता या स्त्री सा तदाख्या” संग्र०। “यजमानपादमात्रीं त्र्यालिखिताम्”२२सू०। ‘महिषीपादमात्री मा भूदिति यजमानग्रहणम्” क०। “त्रिषु स्थानेषु लिखिताम्”संग्र०। “यजमान उखां करोति मृदमादाय मखस्य शिर इति (११,५७) २३ सू०। “मृदादाने मन्त्रः”क०। ‘प्रादेशमात्रीं तिर्यगूर्ध्वां च” २४ सू०। “तिर्यगायामप्रमाणे विस्तारप्रमाणे च” क०। “पञ्चप्रादेशामिषुमात्रीं वा तिर्यक्पञ्चपशौ” २५ सू०। ‘ऊर्ध्वं तु प्रादेशमात्र्येव पञ्चपशावपि” क०। “वसवस्त्वेति (११,५८) प्रथयति” २६ सू०। “आत्तं पिण्डम्” क०। ‘अन्तानुन्नीय सर्वतः प्रथमं धातुमादधाति रुद्रास्त्वेति” (११,५८) २७सू०। “धातुशब्दान्मृत्प्रक्षेप एव” क०। “प्रथितस्य तलप्रान्तानुन्नीय ऊर्ध्वान् गमयति, धातुं प्रथमपिण्डिकाम्” संग्र०। ‘संलिप्य श्लक्ष्णां कृत्वोत्तरमादित्यास्त्वेति” (११,५८) २८सू०। “संलिप्य शिथिलया मृदा संलिप्य वारिणा संश्लक्ष्णां सुकुमारां कृत्वा” संग्र०। “विश्वे त्वेति (११, ५८) समीकरोति” २९सू०। (६,५,२,२) शत० ब्रा०। “वितृतीयउत्तरे वर्तिं सर्वतः करोत्यदित्यै रास्नेति (११,५९) ३०सू०। उखाया ऊर्ध्वप्रमाणस्योत्तरे वितृतीये उपरि वर्त्तमाने तृतीये भागे सर्वतः सर्वासु दिक्षु मृण्मयीं वर्त्तिं वृत्ताकारां रास्नां (काञ्चीगुणस्थानीयाम्) करोति”क०। ‘ऊर्ध्वास्तूष्णीं प्रतिदिशं” ३१सू०। “वर्त्तीः करोति चतस्रोऽपरा वर्तिं प्राप्ताः”३२सू०। उखाशब्दस्याकृतिवचनत्वाद् स्त्रैवोखा भवति” क०। “सर्वासु दिक्षु पार्श्वमध्ये बाह्यप्रदेश अपराश्चतस्रो वृत्तीरूर्ध्वास्तूष्णीं करोति क्रियमाणाः मूलत आरभ्य वृत्तिं प्राप्ताः तिरश्ची रास्नां यावदुच्चाः” संग्र० इति २कण्डिका

“स्तनानिवाग्रे पूञ्चयति” १ सू०। “ऊर्ध्ववर्तीनामेकैकस्याः” क०। “आसां चतसृणां वृत्तीनामग्रेषु तिरश्च्या वृत्तेरुपरि स्तनानिव स्तनसदृशान् मृदवयवानुच्चयति” संग्र०। “द्विस्तनामष्टस्तनामेके” २सू०। “तां हैके द्विस्तनामष्टस्तनामिति (६,५,२, १२) श्रुतेः द्विस्तनपक्षएकस्मिन्नेव वर्त्यग्रे क्रियते अष्टस्तनपक्षे द्वौ द्वाविति क०।“बिलं गृह्णात्यदितिष्टइति”(११,५२) ३सू०। “सुखे गृह्णातीत्यर्थः” क०। “कृत्वायेति (११,५२) निदधाति उखाम्” ४सू०। “तिस्रएके” ५सू०। “उखाः